# श्रीदुर्गासप्तश्लोकी

। अथ सप्तश्लोकी दुर्गा ।

शिव उवाच
देवि त्वं भक्तसुलभे सर्वकार्य विधायिनी ।
कलौ हि कार्य सिद्ध्यर्थम् उपायं ब्रूहि यत्नतः ॥

देव्युवाच
शृणु देव प्रवक्ष्यामि कलौ सर्वेष्ट साधनम् ।
मया तवैव स्नेहेनाप्यम्बा स्तुतिः प्रकाश्यते ॥

ॐ अस्य श्री दुर्गा सप्तश्लोकी स्तोत्र महामन्त्रस्य
नारायण ऋषिः ।
अनुष्टु भादीनि छन्दांसि ।
श्री महाकाली महालक्ष्मी महासरस्वत्यो देवताः ।
श्री दुर्गा प्रीत्यर्थं सप्तश्लोकी दुर्गापाठे विनियोगः ॥

ज्ञानिना मपि चेतांसि देवी भगवती हि सा ।
बला दाकृष्य मोहाय महामाया प्रयच्छति ॥ १॥

दुर्गे स्मृता हरसि भीति मशेष जन्तोः
स्वस्थैः स्मृता मति मतीव शुभां ददासि ।
दारिद्र्य दुःख भय हारिणि का त्वदन्या
सर्वोपकार करणाय सदाऽऽर्द्र चित्ता ॥ २॥

सर्व मङ्गल माङ्गल्ये शिवे सर्वार्थ साधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥ ३॥

शरणागत दीनार्त परित्राण परायणे ।
सर्वस्यार्ति हरे देवि नारायणि नमोऽस्तु ते ॥ ४॥

सर्व स्वरूपे सर्वेशे सर्वशक्ति समन्विते ।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ॥ ५॥

रोगा नशेषा नपहंसि तुष्टा । रुष्टा तु कामान् सकला नभीष्टान् ।
त्वा माश्रितानां न विपन्नराणां । त्वामाश्रिता ह्याश्रयतां प्रयान्ति ॥ ६॥

सर्वा बाधा प्रशमनं त्रैलोक्यस् याखिलेश्वरि ।
एवमेव त्वया कार्यम् अस्मद्वैरि विनाशनम् ॥ ७॥

॥ इति दुर्गा सप्तश्लोकी सम्पूर्णं ॥